महादानविशेषः। यथा,—

मत्स्य उवाच।

"अथातः संप्रवक्ष्यामि ब्रह्माण्डविधिमुत्तमम्।
यच्छ्रेष्ठं सर्व्वदानानां महापातकनाशनम्॥
पुण्यं दिनमथासाद्य तुलापुरुषदानवत्।
ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकम्॥
लोकेशावाहनं तद्वदधिवासनकं यथा।
कुर्य्याद्विंशपलादूर्द्ध्वमासहस्राच्च शक्तितः॥
कलसद्वयसंयुक्तं ब्रह्माण्डं काञ्चनं बुधः।
दिग्गजाष्टकसंयुक्तं षड्वेदाङ्गसमन्वितम्॥
लोकपालाष्टकोपेतं मध्यस्थितचतुर्म्मुखम्।
शिवाच्युतार्कशिखरमुमालक्ष्मीसमन्वितम्॥
वस्वादित्यमरुद्गर्भं महारत्नसमन्वितम्।
वितस्तेरङ्गुलशतं यावदायामविस्तरम्॥
कौशेयवस्त्रसम्बीतं तिलद्रोणोपरि न्यसेत्।
तथाष्टादश धान्यानि समन्तात् परिकल्पयेत्॥
पूर्व्वेणानन्तशयनं प्रद्युम्नं पूर्व्वदक्षिणे।
प्रकृतिं दक्षिणे देशे सङ्कर्षणमतः परम्॥
पश्चिमे चतुरो वेदाननिरुद्धमतः परम्।
अग्निमुत्तरतो हैमं वासुदेवमतःपरम्॥
समन्तादगुडपीठस्थानर्च्चयेत् काञ्चनान् बुधः।
स्थापयेद्वस्त्रसंयुक्तान् पूर्णकुम्भान् दशैव तु॥
दशैव धेनवो देयाः सहेमाम्बरदोहनाः।
पादुकोपानहच्छत्रचामरासनदर्पणैः॥
भक्ष्यभोज्यान्नदीपेक्षुफलमाल्यानुलेपनैः।
होमाधिवासनान्ते तु स्थापितो वेदपुङ्गवैः।
इममुच्चारयेन्मन्त्रं त्रिः कृत्वाथ प्रदक्षिणम्॥
नमोऽस्तु विश्वेश्वर! विश्वधाम
जगत्सवित्रे भगवन्नमस्ते।
सप्तर्षिलोकामरभूतलेश!
गर्भेण सार्द्धं वितरामि रक्षाम्॥
ये दुःखितास्ते सुखिनो भवन्तु
प्रयान्तु पापानि चराचराणाम्।
त्वद्दानशस्त्राहतपातकानां
ब्रह्माण्डदोषाः प्रलयं व्रजन्तु॥
एवं प्रणम्यामरविश्वगर्भं
दद्याद्द्विजेभ्यो दशधा विभज्य।
भागद्वयं तत्र गुरोः प्रकल्प्य
समं भजेच्छेषमतः क्रमेण॥
स्वल्पे तु होमे गुरुरेक एव
कुर्य्यादथैकाग्निविधानयुक्त्या।
स एव संपूज्यतमोऽल्पवित्तै-
र्यथोक्तवस्त्राभरणादिकेन॥
इत्थं य एतदखिलं पुरुषोऽत्र कुर्य्याद्
ब्रह्माण्डदानमधिगम्य महद्विमानम्।
निर्द्धूतकल्मषविशुद्धतनुर्म्मुरारे-
रानन्दकृत्पदमुपैति सहाप्सरोभिः॥
सन्तारयेत् पितृपितामहपुत्त्रपौत्त्रान्
बन्धुप्रियातिथिकलत्त्रशताधिकः सः।
ब्रह्माण्डदानशकलीकृतपापकौघ-
मानन्दयेच्च जननीकुलमप्यशेषम्॥
इति पठति शृणोति वा य एतत्
सुरभवनेषु गृहेषु धार्म्मिकाणाम्।
मतिमपि च ददाति मोदतेऽसा-
वमरपतेर्भवने सहाप्सरोभिः॥"

इति मत्स्यपुराणे महादानानुकीर्त्तने ब्रह्माण्डदानको नाम २५० अध्यायः॥*॥ अपि च।

"इदानीं कार्त्तिकी चेयं वर्त्ततेऽद्य नराधिप!।
ब्रह्माण्डं सर्व्वसम्पन्नं भूतरत्नौषधीयुतम्॥
देवदानवयक्षैश्च युक्तमेतत् सदा विभो!।
एतद्धेममयं कृत्वा सर्व्वबीजरसान्वितम्॥
सरत्नं पुरुषं कृत्वा कार्त्तिक्यां द्वादशीदिने।
अथवा पञ्चदश्यां वै कार्त्तिक्याश्चैव नान्यतः॥
पुरोहिताय गुरवे दापयेद्भक्तिमान्नरः।
ब्रह्माण्डोदरवर्त्तीनि यानि भूतानि पार्थिव!।
तानि दत्तानि तेन स्युः समासात् कथितं तव॥
यो यज्ञैर्यजति राजन्! सहस्रवरदक्षिणैः।
सैकोद्देशो भवेत्तस्य ब्रह्माण्डस्य विशेषतः॥
यः पुनः सकलश्चेदं ब्रह्माण्डं दातुमिच्छति।
तेन यष्टं कृतं दत्तं पठितं कीर्त्तितं भवेत्॥"

वराह उवाच।

"एतत् कृत्वा ततो राजा हेमकुम्भे प्रकल्पनम्।
ब्रह्माण्डन्द्विजये प्रादात् सपिधानश्च तत्क्षणात्॥
सर्व्वकामैः सुसम्बीतो ययौ स्वर्गं नराधिपः॥"

इति वराहपुराणम्॥

ब्रह्मात्मभूः, पुं, (ब्रह्मण आत्मनः शरीरात् भवतीति। ब्रह्मात्मन्+भू+क्विप्।) अश्वः। इति शब्दमाला॥ (अस्य ब्रह्मशरीरजातत्वमुक्तं बृहदारण्यकोपनिषदि।१।२।६-७। तद् यथा,—"प्राणा वै यशोवीर्य्यं तत्प्राणेषूत्क्रान्तेषु शरीरं श्वयितुमध्रियत तस्य शरीर एव मन आसीत्। सोऽकामयत मेध्यं म इदं स्यादात्मन्व्यनेन स्यामिति। ततोऽश्वः समभवद्यदश्वत्तन्मेध्यमभूदिति तदेवाश्वमेधस्याश्वमेधत्वम्।" अत्र शाङ्करभाष्यं यथा,—"प्राणाश्चक्षुरादयः। वै यशो यशोहेतुत्वात्तेषु हि सत्सु ख्यातिर्भवति। तथा वीर्य्यं बलमस्मिन् शरीरे। नह्युत्क्रान्तप्राणो यशस्वी बलवान् भवति। तस्मात् प्राणा एव यशो वीर्य्यं चास्मिन् शरीरे। तदेवं प्राणलक्षणं यशोवीर्य्यमुदक्रामत् उत्क्रान्तवत् तदेवं यशोवीर्य्यभूतेषु प्राणेषूत्क्रान्तेषु शरीरान्निष्क्रान्तेषु तच्छरीरं प्रजापतेः श्वयितुमुच्छूनभावङ्गन्तुमध्रियतामेध्यञ्चाभवत्। तस्य प्रजापतेः शरीरान्निर्गतस्यापि तस्मिन्नेव शरीरे मन आसीत्। यथा कस्यचित् प्रिये विषये दूरङ्गतस्यापि मनो भवति तद्वत्। स तस्मिन्नेव शरीरे गतमनाः सन् किमकरोदिति॥ उच्यते सोऽकामयत कथं मेध्यं मेधार्हं यज्ञियं मे ममेदं शरीरं स्यात्। किञ्चात्मन्वी आत्मवांस्तेन शरीरेण शरीरवान् स्यामिति प्रविवेश। यस्मात्तच्छरीरं मद्वियोगाद्गतयशोवीर्य्यं सदश्वदश्वयत् ततस्तस्मादश्वः समभवत्। ततोऽश्वनामा प्रजापतिरेव साक्षादत्र स्तूयते। यस्माच्च पुनस्तत्प्रवेशात् गतयशोवीर्य्यत्वादमेध्यं सन्मेध्यमभूत् तदेव तस्मादेवाश्वमेधस्याश्वमेधनाम्नः क्रतोरश्वमेधत्वमश्वमेधनाम लाभः॥")

ब्रह्मादनी, स्त्री, हंसपदी। इति राजनिर्घण्टः॥

ब्रह्मादिजाता, स्त्री, (ब्रह्मणः आदिजाता सम्भूता। क्वचित् ब्रह्माभिजाता इति पाठो दृश्यते।) गोदावरी। इति राजनिर्घण्टः॥

ब्रह्मापेतः, पुं, (ब्रह्माणं ब्रह्मतेजःस्वरूपं सूर्य्यमुपेत उपगतः ततः पृषोदरात् साधुः।) माघमासि सूर्य्यनिकटस्थितराक्षसः। यथा,—

"तक्षा च यमदग्निश्च कम्बलोऽथ तिलोत्तमा।
ब्रह्मापेतोऽथ ऋतजिद्धृतराष्ट्रश्च सप्तमः॥
माघमासे वसन्त्येते सप्त मैत्रेय! भास्करे।"

इति विष्णुपुराणे। २। १०। १५॥

ब्रह्मारण्यं, क्ली, (ब्रह्मणो वेदस्य अरण्यमिव।) वेदपाठभूमिः। इति त्रिकाण्डशेषः॥

ब्रह्मार्पणं, क्ली, (ब्रह्मैवार्पणमितिविग्रहे यदर्पणं तद्ब्रह्मैव। यथा, गीतायाम्। ४। २४॥

"ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणाहुतम्॥"

"ब्रह्मार्पणं येन करणेन प्रकारेण ब्रह्मविद्धिरग्नावर्पयति तद्ब्रह्मैवेति पश्यति तस्यात्मव्यतिरेकेणाभावं पश्यति यथा शुक्तिकायां रजताभावं पश्यति तदुच्यते ब्रह्मैवार्पणमिति यथा यद्रजतं तच्छुक्तिकैवेति। ब्रह्म अर्पणमित्यसमस्ते पदे यदर्पणबुद्ध्या गृह्यते लोके तदस्य ब्रह्मविदो ब्रह्मैवेत्यर्थः। इति शाङ्करभाष्यम्॥) ब्रह्मणि समर्पणम्। तत्प्रकारा यथा,

"ब्रह्मणा दीयते देयं ब्रह्मणे संप्रदीयते।
ब्रह्मैव दीयते चेति ब्रह्मार्पणमिदं परम्॥
नाहं कर्त्ता सर्व्वमेतद्ब्रह्मैव कुरुते तथा।
एतद् ब्रह्मार्पणं प्रोक्तं ऋषिभिस्तत्त्वदर्शिभिः॥
प्रीणातु भगवानीशः कर्म्मणानेन शाश्वतः।
करोति सततं बुद्ध्या ब्रह्मार्पणमिदं परम्॥
यद्वा फलानां संन्यासं प्रकुर्य्यात् परमेश्वरे।
कर्म्मणामेतदप्याहुर्ब्रह्मार्पणमनुत्तमम्॥"

इति कूर्म्मपुराणे ४ अध्यायः॥

ब्रह्मावर्त्तः, पुं, (ब्रह्मणां ब्रह्मनिष्ठब्राह्मणानामावर्त्त इव। बहुलब्राह्मणाश्रयत्वादस्य तथात्वम्।) देशविशेषः। तत्पर्य्यायः। तपोवटः २। इति त्रिकाण्डशेषः॥ तत्परिमाणादि यथा,—

"सरस्वतीदृषद्वत्योर्द्देवनद्योर्यदन्तरम्।
तद् देवनिर्म्मितं देशं ब्रह्मावर्त्तं प्रचक्षते॥
तस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः।
वर्णानां सान्तरालानां स सदाचार उच्यते॥
कुरुक्षेत्रञ्च मत्स्याश्च पञ्चालाः शूरसेनकाः।
एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तरः॥
एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्व्वमानवाः॥"

इति मानवे, २। १७-२०॥

(तीर्थविशेषः। यथा, महाभारते ।३।८३।५०।

"ततो गच्छेत धर्म्मज्ञ! ब्रह्मावर्त्तं नराधिप!।
ब्रह्मावर्त्ते नरः स्नात्वा ब्रह्मलोकमवाप्नुयात्॥"